National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 317-318
© 2026 NJHSR
www.sanskritarticle.com

**डॉ.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**Correspondence:**
**डॉ.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# ऐक्यप्रतिष्ठायै नैकाशाखा

**डॉ. मिथुनकुमारशतपथी**

**प्रस्तावना**

ऐक्यप्रतिष्ठायै विश्वबन्धुत्वसंस्थापनम् अनिवार्यं न केवलं ममाभिप्रायः अपितु शास्त्रकारैः संस्थापितः **"वेदोऽखिलो धर्ममूलम्"**[1] वैदिकवाङ्गमयं धर्मस्य मूलाधारभूतं वेदकल्पवृक्षस्य विश्वबन्धुत्वप्रतिष्ठापने महती आवश्यकता अस्ति। वेदः नाम ज्ञानमिति अवगच्छन्ति सर्वे। नैका शाखा विद्यते वेदकल्पवृक्षस्य। धर्मसंस्थापनार्थाय जागरयति अस्मान् सुविस्तृतं वैदिकवाङ्गमयम्।

शास्त्रमनाश्रित्य कापि व्यक्तिः संसाररथचक्रे श्रृंखलितजीवननिर्वाहं कर्तुं अनर्हा। कारणं शास्त्रं सदैव अनुशासनपद्धत्या संचालयति अस्मान्। शास्त्रे अनुशासनं नाम 'धर्मानुसारेणजीवन- निर्वाहम् ।

**कोऽयं धर्मः ?**

समग्रसंसारं यः एव धारयति स एव धर्म इति उच्यते । धर्मेण हीनाः पशुभिस्समानाः। धर्मं विहाय जगत्प्रभवितुं न शक्नोति । एतादृग्भिः धर्मस्य प्रभावः शास्त्रेषु दृश्यते । मनसि संजायते कोऽयं धर्मः ? "अहिंसा परमो धर्मः" विश्वबन्धुत्वस्थापने शास्त्रस्य निर्वचनमिदं प्रामुख्यत्वं बोधयति । पुनश्च महर्षिमनुना उक्तम्। यत् -

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**[2]
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥**

कुल्लुकभट्टटीकायां यथा-

"सन्तोषो धृतिः, परेणापकारे कृते तस्य प्रत्यपकारानाचरणं क्षमा, विकारहेतुविषय-सन्निधानेऽप्यविक्रियत्वं मनसो दमः,"मनसो दमनं दमः" इति सनन्दनवचनात्। शीतातपादि द्वन्दसहिष्णुना दम इनि गोविन्दराजः। अन्यायेन परधनादिग्रहणं स्तेयं तद्भिन्नमस्तेयं, यथा शास्त्रं मृज्जलाभ्यां देहशोधनं शौचं, विषयेभ्यश्चतुरादिवारणमिन्द्रियनिग्रहः, शास्त्रादितत्वज्ञानं धीः, आत्मज्ञानं विद्या यथार्थभिधानं सत्यम्, क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिरक्रोधः, एतद्दशविधं धर्मस्वरूपम्।

**हिन्द्विति कथनस्य को आशयः?**

हीनं दूषयतीति हिन्दुः।

**हिमालयात् समारभ्यः यावत् इन्दुसरोवरम्।**[3]
**तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।।**

अस्माकं भारतवर्षस्य सीमानिर्धारणविषये श्लोकोऽयं अस्मभ्यः परिचयं प्रयच्छति। अस्माकं भारतवर्षं हिन्दुस्तानमिति अनेन श्लोकेन ज्ञायते। वसुधैवकुटुम्बकभावना अस्मान् शिक्षयति। हिन्दुधर्मशास्त्रस्य शास्त्रीयशिक्षा का इति ?

**हिन्दुपरिचयः**

**हिमालयं समारभ्येत् यावत् इन्दुं सरोवरम्।**[4]
**तत्रस्था जननायातु सा हिन्दुरिति कथ्यते॥**

हिंसा च दृश्यते यत्र सदाचारणतत्परः।
गो विप्रप्रतिमातुलसी प्राङ्गणे यस्य सः हिन्दुरिति कथ्यते।।
हिनस्ति भवानां यातु हीनां प्रसवतु मुदा।[5]
रामकृष्णास्ति यत्र सः हिन्दुरिति कथ्यते॥
मधुवाताऋतायते मधुः क्षरन्ति सिन्धवः।[6]
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।[7]
सर्वे भद्राणि पश्यन्तु मा कश्चिदुःखभागुभवेत्॥
आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरितासउद्भिदः।[8]
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे॥
अयं निजः परो वेति गणना लघुचेतसाम्।[9]
उदारचरितानां तु वसुधैव कुटुम्बकम्।।
ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।[10]
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।[11]
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा॥
मातृ देवो भव पितृ देवो भव[12]
आचार्य देवो भव अतिथि देवो भव
यान्यनवद्यानि कर्माणि तानि सेवितव्यानि
नो इतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि।।
धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठ प्रजा उपसर्पन्ति।[13]
धर्मेण पापमपनुदति धर्मे सर्व प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति॥
संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।[14]
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।

**उपसंहारः**

उपसंह्रियते मया विश्वं प्रति गवाक्षेण शास्त्रीयवार्ता प्रेषणीया। अनेन "सर्वे भवन्तु सुखिनः" अयं शास्त्रप्रचोदितन्यायः। कृत्स्नमिदं जगत् (विश्वबन्धुत्वस्य) भावनायाः दार्ढ्यत्वं प्रयच्छति।

**पाद टिप्पणी:**

[1]म.स्मृ-2.6

[2]म.स्मृ-6.92

[3]बृहस्पति आगमः

[4]सुमेरुतन्त्रम्

[5]सुमेरुतन्त्रम्

[6]शु.य.मा

[7]बृहदारण्यक उपनिषद्

[8]ऋग्वेदः 1.89.1

[9]महाउपनिषद्-672

[10]ई.उ.1

[11]भज गोविंदम श्लोक 11

[12]तै.उ-१.११.२

[13]तै.उ-१.११.३

[14]ऋग्वेदः 10.191.2